# shatadUShaNIstha HayagrIvastotram

# શતદૂષણીસ્થહયગ્રીવસ્તોત્રમ્

## Document Information

Text title : shatadUShaNIstha hayagrIvastotram 4

File name : shatadUShaNIsthahayagrIvastotram.itx

Category : vishhnu, vishnu

Location : doc_vishhnu

Transliterated by : Vedha Nathan vnathan.lab at gmail.com

Proofread by : Vedha Nathan vnathan.lab at gmail.com, NA

Latest update : February 2, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 27, 2024

*sanskritdocuments.org*

# શતદૂષણીસ્થહયગ્રીવસ્તોત્રમ્

શ્રીલક્ષ્મીહયવદનપરબ્રહ્મણે નમઃ ।
શ્રીમાન્ વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥

સમાહારસ્સામ્નાં પ્રતિપદમૃચાં ધામ યજુષા
    લયઃ પ્રત્યૂહાનાં લહરિવિતતિર્બોધજલધેઃ ।
કથાદર્પક્ષુભ્યત્કલિકથકકોલાહલભવં
    હરત્વન્તર્ધ્વાન્તં હયવદનહેષાહલહલઃ ॥ ૧॥

હયગ્રીવસુધાસિન્ધુહર્ષહેષારવોર્મયઃ।
જયન્તિ વાદવેલાન્તક્ષિપ્તબાહ્યકુદૃષ્ટયઃ ॥ ૨॥

સંપ્રજ્ઞાતસ્થિતિમધિગતે નિર્વિકલ્પે સમાધૌ
    શાન્તાવધ્યં સ્તિમિતબહુલાનન્દસન્દાહમન્તઃ ।
યત્તદ્બ્રહ્મ સ્ફુરતિ યમિનાં પૂર્ણષાડ્ગુણ્યરૂપં
    સા મે નિત્યં હૃદિ હયમુખી દેવતા સન્નિધત્તામ્ ॥ ૩॥

યદાત્માનો વેદા યદનુગુણવર્ણાકૃતિજુષઃ
    પ્રમાણં યત્રૈતે નિયતમપરિચ્છેધ્યવિભવે ।
ય એષામાહર્તા દનુજમથનો વાજિવદનઃ
    સ મે દેવઃ શ્રીમાન્ વિદલયતુ સમ્મોહમખિલમ્ ॥ ૪॥

અબાધાદધ્યક્ષપ્રભૃતિ મિતિવર્ગેષ્વવધૃતં
    શરીરં યસ્યેદં જગદખિલમન્તર્યમયિતુઃ ।
સ મે તર્કૈરેતૈર્નિજવિભવલુણ્ટાકમથનૈઃ
    પ્રસીદત્વાસીદન્નિગમશતસીમા હયમુખઃ ॥ ૫॥

અજ્ઞાનસન્તમસમાશ્રયણોન્મુખાનાં
    સંવિત્પ્રદીપમહસા સહસા નિરુન્ધન્ ।

વિદ્યાસ્વયંવરપતિર્વ્યપહન્ત્વવિદ્યાં
    સર્વાનુભૂઃ સ ભગવાન્ પુરુષોત્તમો નઃ ॥ ૬॥

વિદિતમનુવદન્તો વિશ્વમેતદ્યથાવત્
    વિદધતિ નિગમાન્તાઃ કેવલં યન્મયત્વમ્ ।
અવિદિતબહુભૂમા નિત્યમન્તર્વિધત્તાં
    હયવરવદનોસૌ સન્નિધિઃ સન્નિધિં નઃ ॥ ૭॥

હયમુખમુખૈસ્તત્તદ્રૂપૈરકર્મવિનિર્મિતૈ-
    રુપદિશતિ યસ્તથ્યં પથ્યં સતામવસીદતામ્ ।
જનનપદવીયાતાયાતશ્રમાપહરાં ધિયં
    જનયતુ સ મે દેવઃ શ્રીમાન્ ધનઞ્જયસારથિઃ ॥ ૮॥

નમસ્ત્રેધા વિભક્તાનામાત્મનામન્તરાત્મને ।
બ્રહ્મણે હયવક્ત્રાય બન્ધમોક્ષૈકહેતવે ॥ ૯॥

ય એકો દુર્લઙ્ઘ્યત્રિગુણનિજમયાનિગલિતૈ-
    ર્વિચિત્રૈઃ ક્ષેત્રજ્ઞૈર્વિહરતિ સરોજાસહચરઃ ।
જગત્સર્ગક્ષેમક્ષપણપરિકર્મીણમહિમા
    દયાલુર્દેવોસૌ તુરગવદનસ્તારયતુ નઃ ॥ ૧૦॥

અનન્યાનાં પુંસામનવધિકભક્તિસ્થિતિજુષા-
    મવિદ્યાધ્વંસો યચ્ચરણવરિવસ્યાપરિણતેઃ ।
તદેકં સત્સંવિત્સુખમવધિદૂરિકૃતગુણં
    હતાશેષાવદ્યં હયવદનમીડીમહિ મહઃ ॥ ૧૧॥

હતાશેષક્લેશા નિરવધિ મહાનન્દઘનિનો
    વયં ભૂયાસ્મેતિ સ્થિરમનઘવર્મન્યધિકૃતાઃ ।
અનાઘ્રાતદ્વન્દ્વા હયમુખપદદ્વન્દ્વરુચયઃ
    સ્વદન્તાં મે સન્તઃ શ્રુતિજલધિમુષ્ટિન્ધયધિયઃ ॥ ૧૨॥

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

ઇતિ શ્રીશતદૂષણીસ્થહયગ્રીવસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Vedha Nathan vnathan.lab at gmail.com, NA

*shatadUShaNIstha HayagrIvastotram*

pdf was typeset on April 27, 2024

Please send corrections to *sanskrit@cheerful.com*